

# Online Chinmaya Geeta Fest - 2021

## Bhagwad Geeta Chapter - II

## SĀṄKHYA YOGAḤ

### The Yoga of Knowledge



**CHANT GEETA**

**ENCHANT KRISHNA**

Elocution | Video Quiz | Geeta Chanting for Children and Elders

**CHINMAYA MISSION MULUND**

www.chinmayamissionmulund.com

|ॐ श्री परमात्मने नमः|

| अथ द्वितीयोऽध्यायः |

| साङ्ख्य योगः |

सञ्जय उवाच ।

तं तथा कृपयाविष्टम् अश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यम् उवाच मधुसूदनः ॥१॥

श्रीभगवानुवाच ।

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यम् अकीर्तिकरमर्जुन ॥२॥

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥३॥

अर्जुन उवाच ।

कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रति योत्स्यामि पूजार्हावरिसूदन ॥४॥

*|om śrīparamātmane namaḥ|*

I atha dvitīyo'dhyāyaḥ I

I sāṅkhya yogaḥ I

sañjaya uvāca

taṁ tathā kṛpayāviṣṭam
aśrupūrṇākulekṣaṇam
viṣīdantamidaṁ vākyam
uvāca madhusūdanaḥ II 1 II

śrībhagavānuvāca

kutastvā kaśmalamidaṁ
viṣame samupasthitam
anāryajuṣṭamasvargyam
akīrtikaramarjuna II 2 II

klaibyaṁ mā sma gamaḥ pārtha
naitattvayyupapadyate
kṣudraṁ hṛdayadaurbalyaṁ
tyaktvottiṣṭha parantapa II 3 II

arjuna uvāca

kathaṁ bhīṣmamahaṁ saṅkhye
droṇaṁ ca madhusūdana
iṣubhiḥ prati yotsyāmi
pūjārhāvarisūdana II 4 II

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥५॥

न चैतद्विद्मः कतरन्नो गरीयः
यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामः
तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥६॥

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसम्मूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥७॥

न हि प्रपश्यामि ममापनुद्याद्
यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धम्
राज्यं सुराणामपि चाधिपत्यम् ॥८॥

सञ्जय उवाच ।

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तप ।
न योत्स्य इति गोविन्दम् उक्त्वा तूष्णीं बभूव ह ॥९॥

gurūnahatvā hi mahānubhāvān
śreyo bhoktuṁ bhaikṣyamapīha loke
hatvārthakāmāṁstu gurunihaiva
bhuñjjīya bhogān rudhirapradigdhān II 5 II

na caitadvidmaḥ kataranno garīyaḥ
yadvā jayema yadi vā no jayeyuḥ
yāneva hatvā na jijīviṣāmaḥ
te'vasthitāḥ pramukhe dhārtarāṣṭrāḥ II 6 II

kārpaṇyadoṣopahatasvabhāvaḥ
pṛcchāmi tvāṁ dharmasammūḍhacetāḥ
yacchreyaḥ syānniścitaṁ brūhi tanme
śiṣyaste'haṁ śādhi māṁ tvāṁ prapannam II 7 II

na hi prapaśyāmi mamāpanudyād
yacchokamucchoṣaṇamindriyāṇām
avāpya bhūmāvasapatnamṛddham
rājyaṁ surāṇāmapi cādhipatyam II 8 II

sañjaya uvāca

evamuktvā hṛṣīkeśaṁ
guḍākeśaḥ parantapa
na yotsya iti govindam
uktvā tūṣṇīṁ babhūva ha II 9 II

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥१०॥

श्रीभगवानुवाच ।

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥११॥

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥१२॥

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिः धीरस्तत्र न मुह्यति ॥१३॥

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्याः तांस्तितिक्षस्व भारत ॥१४॥

tamuvāca hṛṣīkeśaḥ
prahasanniva bhārata
senayorubhayormadhye
viṣīdantamidaṁ vacaḥ II 10 II

śrībhagavānuvāca

aśocyānanvaśocastvaṁ
prajñāvādāṁśca bhāṣase
gatāsūnagatāsūṁśca
nānuśocanti paṇḍitāḥ II 11 II

na tvevāhaṁ jātu nāsaṁ
na tvaṁ neme janādhipāḥ
na caiva na bhaviṣyāmaḥ
sarve vayamataḥ param II 12 II

dehino'sminyathā dehe
kaumāraṁ yauvanaṁ jarā
tathā dehāntaraprāptiḥ
dhīrastatra na muhyati II 13 II

mātrāsparśāstu kaunteya
śītoṣṇasukhaduḥkhadāḥ
āgamāpāyinonityāḥ
tāṁstitikṣasva bhārata II 14 II

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥१५॥

नासतो विद्यते भावः नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तः त्वनयोस्तत्त्वदर्शिभिः ॥१६॥

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥१७॥

अन्तवन्त इमे देहाः नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥१८॥

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतः नायं हन्ति न हन्यते ॥१९॥

न जायते म्रियते वा कदाचित्
नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणः
न हन्यते हन्यमाने शरीरे ॥२०॥

yaṁ hi na vyathayantyete
puruṣaṁ puruṣarṣabha
samaduḥkhasukhaṁ dhīraṁ
so'mṛtatvāya kalpate II 15 II

nāsato vidyate bhāvaḥ
nābhāvo vidyate sataḥ
ubhayorapi dṛṣṭo'ntaḥ
tvanayostattvadarśibhiḥ II 16 II

avināśi tu tadviddhi
yena sarvamidaṁ tatam
vināśamavyayasyāsya
na kaścitkartumarhati II 17 II

antavanta ime dehāḥ
nityasyoktāḥ śarīriṇaḥ
anāśino'prameyasya
tasmādyudhyasva bhārata II 18 II

ya enaṁ vetti hantāraṁ
yaścainaṁ manyate hatam
ubhau tau na vijānītaḥ
nāyaṁ hanti na hanyate II 19 II

na jāyate mriyate vā kadācit
nāyaṁ bhūtvā bhavitā vā na bhūyaḥ
ajo nityaḥ śāśvato'yaṁ purāṇaḥ
na hanyate hanyamāne śarīre II 20 II

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥२१॥

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णानि
अन्यानि संयाति नवानि देही ॥२२॥

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापः न शोषयति मारुतः ॥२३॥

अच्छेद्योऽयमदाह्योऽयम् अक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुः अचलोऽयं सनातनः ॥२४॥

अव्यक्तोऽयमचिन्त्योऽयम् अविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥२५॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥२६॥

vedāvināśinaṁ nityaṁ
ya enamajamavyayam
kathaṁ sa puruṣaḥ pārtha
kaṁ ghātayati hanti kam II 21 II

vāsāṁsi jīrṇāni yathā vihāya
navāni gṛhṇāti naro'parāṇi
tathā śarīrāṇi vihāya jīrṇāni
anyāni saṁyāti navāni dehī II 22 II

nainaṁ chindanti śastrāṇi
nainaṁ dahati pāvakaḥ
na cainaṁ kledayantyāpaḥ
na śoṣayati mārutaḥ II 23 II

acchedyo'yamadāhyo'yam
akledyo'śoṣya eva ca
nityaḥ sarvagataḥ sthāṇuḥ
acalo'yaṁ sanātanaḥ II 24 II

avyakto'yamacintyo'yam
avikāryo'yamucyate
tasmādevaṁ viditvainaṁ
nānuśocitumarhasi II 25 II

atha cainaṁ nityajātaṁ
nityaṁ vā manyase mṛtam
tathāpi tvaṁ mahābāho
naivaṁ śocitumarhasi II 26 II

जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥२७॥

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥२८॥

आश्चर्यवत्पश्यति कश्चिदेनम्
आश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित् ॥२९॥

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥३०॥

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥३१॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥३२॥

jātasya hi dhruvo mṛtyuḥ
dhruvaṁ janma mṛtasya ca
tasmādaparihāryer'the
na tvaṁ śocitumarhasi II 27 II

avyaktādīni bhūtāni
vyaktamadhyāni bhārata
avyaktanidhanānyeva
tatra kā paridevanā II 28 II

āścaryavatpaśyati kaścidenam
āścaryavadvadati tathaiva cānyaḥ
āścaryavaccainam anyaḥ śṛṇoti
śrutvāpyenaṁ veda na caiva kaścit II 29 II

dehī nityamavadhyo'yaṁ
dehe sarvasya bhārata
tasmātsarvāṇi bhūtāni
na tvaṁ śocitumarhasi II 30 II

svadharmamapi cāvekṣya
na vikampitumarhasi
dharmyāddhi yuddhācchreyo'nyat
kṣatriyasya na vidyate II 31 II

yadṛcchayā copapannaṁ
svargadvāram apāvṛtam
sukhinaḥ kṣatriyāḥ pārtha
labhante yuddham īdṛśam II 32 II

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥३३॥

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
सम्भावितस्य चाकीर्तिः मरणादतिरिच्यते ॥३४॥

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतः भूत्वा यास्यसि लाघवम् ॥३५॥

अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥३६॥

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥३७॥

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥३८॥

atha cettvamimaṁ dharmyaṁ
saṅgrāmaṁ na kariṣyasi
tataḥ svadharmaṁ kīrtiṁ ca
hitvā pāpamavāpsyasi II 33 II

akīrtiṁ cāpi bhūtāni
kathayiṣyanti te'vyayām
saṁbhāvitasya cākīrtiḥ
maraṇādatiricyate II 34 II

bhayādraṇāduparataṁ
maṁsyante tvāṁ mahārathāḥ
yeṣāṁ ca tvaṁ bahumataḥ
bhūtvā yāsyasi lāghavam II 35 II

avācyavādāṁśca bahūn
vadiṣyanti tavāhitāḥ
nindantastava sāmarthyaṁ
tato duḥkhataraṁ nu kim II 36 II

hato vā prāpsyasi svargaṁ
jitvā vā bhokṣyase mahīm
tasmāduttiṣṭha kaunteya
yuddhāya kṛtaniścayaḥ II 37 II

sukhaduḥkhe same kṛtvā
lābhālābhau jayājayau
tato yuddhāya yujyasva
naivaṁ pāpamavāpsyasi II 38 II

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥३९॥

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥४०॥

व्यवसायात्मिका बुध्दिः एकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१॥

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२॥

कामात्मानः स्वर्गपराः जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३॥

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुध्दिः समाधौ न विधीयते ॥ ४४॥

eṣā te'bhihitā sāṅkhye
buddhiryoge tvimāṁ śṛṇu
buddhyā yukto yayā pārtha
karmabandhaṁ prahāsyasi II 39 II

nehābhikramanāśo'sti
pratyavāyo na vidyate
svalpamapyasya dharmasya
trāyate mahato bhayāt II 40 II

vyavasāyātmikā buddhiḥ
ekeha kurunandana
bahuśākhā hyanantāśca
buddhayo'vyavasāyinām II 41 II

yāmimāṁ puṣpitāṁ vācaṁ
pravadantyavipaścitaḥ
vedavādaratāḥ pārtha
nānyadastīti vādinaḥ II 42 II

kāmātmānaḥ svargaparāḥ
janmakarmaphalapradām
kriyāviśeṣabahulāṁ
bhogaiśvaryagatiṁ prati II 43 II

bhogaiśvaryaprasaktānāṁ
tayāpahṛtacetasām
vyavasāyātmikā buddhiḥ
samādhau na vidhīyate II 44 II

त्रैगुण्यविषया वेदाः निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थः निर्योगक्षेम आत्मवान् ॥ ४५॥

यावानर्थ उदपाने सर्वतः सम्प्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥ ४६॥

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ॥४७॥

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ ४८॥

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५०॥

traiguṇyaviṣayā vedāḥ
nistraiguṇyo bhavārjuna
nirdvandvo nityasattvasthaḥ
niryogakṣema ātmavān II 45 II

yāvānartha udapāne
sarvataḥ samplutodake
tāvānsarveṣu vedeṣu
brāhmaṇasya vijānataḥ II 46 II

karmaṇyevādhikāraste
mā phaleṣu kadācana
mā karmaphalaheturbhūḥ
mā te saṅgo'stvakarmaṇi II 47 II

yogasthaḥ kuru karmāṇi
saṅgaṁ tyaktvā dhanañjaya
siddhyasiddhyoḥ samo bhūtvā
samatvaṁ yoga ucyate II 48 II

dūreṇa hyavaraṁ karma
buddhiyogāddhanañjaya
buddhau śaraṇamanviccha
kṛpaṇāḥ phalahetavaḥ II 49 II

buddhiyukto jahātīha
ubhe sukṛtaduṣkṛte
tasmādyogāya yujyasva
yogaḥ karmasu kauśalam II 50 II

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ ५१ ॥

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुध्दिः तदा योगमवाप्स्यसि ॥ ५३॥

अर्जुन उवाच ।

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ ५४॥

श्रीभगवानुवाच ।

प्रजहाति यदा कामान् सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५॥

karmajaṁ buddhiyuktā hi
phalaṁ tyaktvā manīṣiṇaḥ
janmabandhavinirmuktāḥ
padaṁ gacchhantyanāmayam II 51 II

yadā te mohakalilaṁ
buddhirvyatitariṣyati
tadā gantāsi nirvedaṁ
śrotavyasya śrutasya ca II 52 II

śrutivipratipannā te
yadā sthāsyati niścalā
samādhāvacalā buddhiḥ
tadā yogamavāpsyasi II 53 II

arjuna uvāca

sthitaprajñasya kā bhāṣā
samādhisthasya keśava
sthitadhīḥ kiṁ prabhāṣeta
kimāsīta vrajeta kim II 54 II

śrībhagavānuvāca

prajahāti yadā kāmān
sarvānpārtha manogatān
ātmanyevātmanā tuṣṭaḥ
sthitaprajñastadocyate II 55 II

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६॥

यः सर्वत्रानभिस्नेहः तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८॥

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६०॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१॥

duḥkheṣvanudvignamanāḥ
sukheṣu vigataspṛhaḥ
vītarāgabhayakrodhaḥ
sthitadhīrmunirucyate II 56 II

yaḥ sarvatrānabhisnehaḥ
tattatprāpya śubhāśubham
nābhinandati na dveṣṭi
tasya prajñā pratiṣṭhitā II 57 II

yadā saṁharate cāyaṁ
kūrmo'ṅgānīva sarvaśaḥ
indriyāṇīndriyārthebhyaḥ
tasya prajñā pratiṣṭhitā II 58 II

viṣayā vinivartante
nirāhārasya dehinaḥ
rasavarjaṁ raso'pyasya
paraṁ dṛṣṭvā nivartate II 59 II

yatato hyapi kaunteya
puruṣasya vipaścitaḥ
indriyāṇi pramāthīni
haranti prasabhaṁ manaḥ II 60 II

tāni sarvāṇi saṁyamya
yukta āsīta matparaḥ
vaśe hi yasyendriyāṇi
tasya prajñā pratiṣṭhitā II 61 II

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥ ६२॥

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशः बुद्धिनाशात्प्रणश्यति ॥ ६३॥

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५॥

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिः अशान्तस्य कुतः सुखम् ॥ ६६॥

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६७॥

dhyāyato viṣayānpuṁsaḥ
saṅgasteṣūpajāyate
saṅgātsañjāyate kāmaḥ
kāmātkrodho'bhijāyate II 62 II

krodhādbhavati sammohaḥ
sammohātsmṛtivibhramaḥ
smṛtibhraṁśād buddhināśaḥ
buddhināśātpraṇaśyati II 63 II

rāgadveṣaviyuktaistu
viṣayānindriyaiścaran
ātmavaśyairvidheyātmā
prasādamadhigacchati II 64 II

prasāde sarvaduḥkhānāṁ
hānirasyopajāyate
prasannacetaso hyāśu
buddhiḥ paryavatiṣṭhate II 65 II

nāsti buddhirayuktasya
na cāyuktasya bhāvanā
na cābhāvayataḥ śāntiḥ
aśāntasya kutaḥ sukham II 66 II

indriyāṇāṁ hi caratāṁ
yanmano'nuvidhīyate
tadasya harati prajñāṁ
vāyurnāvamivāmbhasi II 67 II

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८॥

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९॥

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥ ७०॥

विहाय कामान्यः सर्वान् पुमांश्चरति निःस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥ ७१॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ ७२॥

ॐ तत्सदिति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगो नाम
द्वितीयोऽध्यायः ॥ २॥

॥ हरिः ॐ ॥ ॥ श्री गुरुभ्यो नमः ॥ ॥ हरिः ॐ ॥

tasmādyasya mahābāho
nigṛhītāni sarvaśaḥ
indriyāṇīndriyārthebhyaḥ
tasya prajñā pratiṣṭhitā II 68 II

yā niśā sarvabhūtānāṁ
tasyāṁ jāgarti saṁyamī
yasyāṁ jāgrati bhūtāni
sā niśā paśyato muneḥ II 69 II

āpūryamāṇamacalapratiṣṭhaṁ
samudramāpaḥ praviśanti yadvat
tadvatkāmā yaṁ praviśanti sarve
sa śāntimāpnoti na kāmakāmī II 70 II

vihāya kāmānyaḥ sarvān
pumāṁścarati niḥspṛhaḥ
nirmamo nirahaṅkāraḥ
sa śāntimadhigacchati II 71 II

eṣā brāhmī sthitiḥ pārtha
naināṁ prāpya vimuhyati
sthitvāsyāmantakāle'pi
brahmanirvāṇamṛcchati II 72 II

*om tatsaditi śrīmadbhagavadgītāsu upaniṣatsu*
*brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde*
*sāṅkhyayogo nāma dvitīyo'dhyāyaḥ* II 2 II
II *hariḥ om* II II *śrī gurubhyo namaḥ* II II *hariḥ om* II

# BALVIHAR

CHINMAYA MISSION'S CHILDRENS INTERNATIONAL MONTHLY

## WHEN YOU GIFT YOUR CHILDREN BALVIHAR MAGAZINE YOU GIVE THEM

| | |
|---|---|
| VALUES | QUIZZES |
| CULTURE | ETHICS |
| ACTIVITIES | JOKES |
| PUZZLES | SCIENCE |

## SUBSCRIPTION RATES

### OUTSIDE INDIA

| | |
|---|---|
| Long Term (15 Yrs.) | US$ 500 |
| Five Years | US$ 200 |
| Three Years | US$ 120 |
| Two Years | US$ 80 |
| One Year | US$ 50 |

### INDIA

| | |
|---|---|
| Long Term (15 Yrs.) | Rs. 3,500/- |
| Five Years | Rs. 1,200/- |
| Three Years | Rs. 700/- |
| One Year | Rs. 250/- |

Draw Drafts and Cheques in favour of 'Central Chinmaya Mission Trust' you can also subscribe online at www.chinmayapublications.org (Outside India)

CONTACT US AT : CENTRAL CHIINMAYA MISSION TRUST
SANDEEPANY SADHNALAYA, SAKI VIHAR ROAD
POWAI, MUMBAI – 400 072 (INDIA)
TEL :- 2857 2367, 2857 5806,2857 2828 FAX : 2857 3065
EMAIL : balvihar@chinmayamission.com, bveditor@chinmayamission.com

